# Siddhantashikha Upanishad

# સિદ્ધાન્તશિખોપનિષત્

## Document Information

Text title : siddhAntashikhopaniShat

File name : siddhAntashikhopaniShat.itx

Category : upanishhat, shiva, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# સિદ્ધાન્તશિખોપનિષત્

ૐ અથ ભારદ્વાજઃ કુમારં પપ્રચ્છ । કોઽયં ભવાદૃશાનાં
પરમશિવભક્તાનાં સિદ્ધાન્તઃ । કુતઃ સર્વે ન વિદન્તીતિ ।
તદ્ધહ્યમુવાચ સ્કન્દઃ । ભારદ્વાજ શ઼ૃણુ નામ ક્વચિદ્વદન્તિ સામ્બં
સર્વદેવપ્રકૃષ્ટં શિવં વરેણ્યં પક્વચિત્તાઃ શિવસ્ય પ્રસાદતો
જ્ઞાનમાત્રાદ્વિદન્તિ ॥

વિશ્વાધિકં શઙ્કરં યે પ્રમૂઢા હીનં વિષ્ણોર્બ્રહ્મણો વા વદન્તિ ।
ન સંસારાત્ પ્રમુચ્યન્તે કદાચિચ્છતૈઃ કલ્પૈઃ કોટિભિર્વાઽથદોષૈઃ ॥

યથા રાજ્ઞો કુર્વન્નમાત્યબુદ્ધિં
દેહી વિન્દેદ્બાધમસ્માદ્વિનષ્ટમ્ ।
સત્યાદિરૂપં શિવમેવં વિદાનો
વિષ્ણ્વાદિબુદ્ધ્યા હીયતેઽજ્ઞાનસઙ્ગાત્ ॥

મહાનગ્નિઃ કાષ્ઠમાર્દ્રં ચ શુષ્કં કૃત્વા દહેદીશ્વરોત્કૃષ્ટબુદ્ધિઃ ।
દહેત્ પાપાન્યાશુ વિજ્ઞાનદાત્રી ન સંસારે મજ્જતે વા કદાચિત્ ॥

મહાદેવે ત્રિપુણ્ડ્રસ્ય ધારણે ભસ્મકુણ્ઠને ।
પુણ્યલેશવિહીનસ્ય શ્રદ્ધા નૈવ પ્રજાયતે ॥

પાપપૂર્ણસ્ય મર્ત્યસ્ય ત્રિપુણ્ડ્રોદ્ધૂલને શિવે ।
રુદ્રાક્ષધારણે દ્વેષઃ સ્વત યુવ પ્રજાયતે ॥

જન્મગયનન્તાનિ વિસ્તીર્ય ભૂયઃ શિવપ્રસાદાદ્ધૃતપુણ્યલેશઃ ।
શિવે ભક્તિં પ્રાપ્ય તદ્ભક્તસઙ્ગાન્ન સંસૃતૌ ઘોરદુઃખાત્ પ્રમજ્જેત્ ॥

યોઽજ્ઞાનાદ્વા શિવશબ્દં ગૃણાનઃ પાપૈર્ઘોરૈર્મુચ્યતે વા કદાચિત્ ।
કો વા વેત્તા મહિમાનં શિવસ્ય પરાત્ પરસ્ય જ્ઞાનગુહ્યસ્ય ગુહ્યમ્ ।
સદ્યોજાતાદ્બ્રાહ્મણાઃ સમ્બભૂવુર્વામદેવાત્ ક્ષત્રિયા વૈ વિશશ્ચ ।
અઘોરાચ્છૂદ્રાસ્તત્પુરુષાચ્છિવસ્ય પઞ્ચાત્મકસ્ય ગણા ઈશતોઽસ્ય ॥

આત્માશ્રમિત્વાદ્બ્રાહ્મણવંશજાતા લિઙ્ગાઙ્ગસઙ્ગમ્તત્ર જન્માન્તદીક્ષા ।
યથા ગઙ્ગા શિવસઙ્ગાત્તથૈવ ન સૂતકં વા નાપ્યશુચિત્વમેષામ્ ॥

ગચ્છાસ્તિષ્ઠન્નિમિષન્નુન્મિષન્ વા સ્વપઞ્ચાગ્રાલ્લિઙ્ગધારી શુચિઃ સ્યાત્ ।
ભુઞ્જન્ મૂત્રાદ્યુત્સૃજન્ વા કદાચિન્ન તત્રોચ્છિષ્ટં ભજતે શુદ્ધદેહી ॥

શીર્ષે કણ્ઠે વક્ષસિ કક્ષદેશે નાભૌ હસ્તે સર્વદા પ્રાણલિઙ્ગમ્ ।
ધાર્યં યથાસંપ્રદાયં પરસ્તાદ્ગુરોર્વિદિત્વા હૃદયે મુખ્યમુક્તમ્ ॥

સ્નાનં કૃત્વા શિવતીર્થે ચ દેહં સર્વં ભસ્મોદ્ધૂલનાત્ પાવયિત્વા ।
ત્રિપુણ્ડ્રં ધાર્યં ભર્ત્સનાત્ પાતકૌઘગિરેર્ભસ્મ પ્રાહુરત્યર્થમેતત્ ॥

સ્નાનં ત્રિપુણ્ડ્રસ્ય શિરોલલાટવક્ષઃસ્કન્ધમણિબન્ધેષુ કૂર્પે ।
નાભિપ્રદેશે પાર્શ્વયોર્ગણ્ડદેશે ગુદપ્રદેશે ગુલ્ફયોશ્ચ ક્રમાત્ સ્યાત્ ॥

વહ્નિત્રયં તચ્ચ જગત્ત્રયં યદ્ગુણત્રયં તચ્ચ શક્તિત્રયં સ્યાત્ ।
ધૃતં ત્રિપુણ્ડ્રં યદિ કોઽપિ દૈવાત્ તદ્દૃષ્ટ્વાન્યઃ પાતકૌઘાદ્વિમુક્તઃ ॥

નિમીલિતાક્ષસ્ય પુરત્રયાણિ
    દગ્ધાઃ શમ્ભોર્નયનેભ્યોઽથ યે તુ ।
જાતા રુદ્રાક્ષા જલબિન્દવોઽસ્ય
    સદ્યોજાતાદીન્ પઞ્ચ વક્ત્રાણિ વિન્દ્યાત્ ॥

દ્વાત્રિંશદ્રુદ્રાક્ષાઃ કણ્ઠમાલાપ્રયુક્તાઃ
    શિખાયામેકો દ્વિચત્વારિંશદુક્તાઃ ।
શિરોધાર્યાઃ કર્ણયોર્દ્વાદશાઽથ
    શતત્રયં તૂપવીતં ચ બાહ્વોઃ ॥

દ્વાત્રિંશદુક્તા મણિબન્ધયોશ્ચ ચતુર્વિંશાઃ શતમષ્ટૌ જપાર્થમ્ ।
પુરા લીનાઃ સૃષ્ટિકાલાચ્છિવસ્ય પઞ્ચાક્ષરે મન્ત્રવર્યે સમસ્તાઃ ।
ભૂતાનિ પઞ્ચ વેદા આગમાશ્ચ શિવાલ્લબ્ધોઽભૂન્મન્ત્રવર્યો વિધાત્રા ॥

દેહિનો દેહમાયાન્તિ ન યાવન્મન્ત્રનાયકઃ ।
તાવત્પાપાનિ ગર્જન્તિ સત્યં સત્યં પુનઃ પુનઃ ॥

યોઽયં નકારઃ સોઽયમકારઃ સ સદ્યોજાતો ભૂરૃગ્વેદઃ સમ્પુટમુચ્યતે ।
યોઽયં મકારઃ સોઽયમુકારઃ સ વામદેવ આપો યજુર્વેદો વક્ત્રમુચ્યતે ।
યોઽયં શિકારઃ સોઽયં મકારઃ સ ઘોરઃ સ વાયુઃ સામવેદો ગુણ ઉચ્યતે ।
યોઽયં વકારઃ સોઽયં નાદઃ સ તત્પુરુષઃ સ

તેજોઽથર્વવેદોઽઘોરમુચ્યતે ।
યોઽયં યકારઃ તદિદં સમસ્તમોમિતિ નિર્વિશોપ્રાણવઃ સ સર્વોત્તમ
ઈશાન આકાશ આગમો લિઙ્ગમુચ્યતે । ઇત્યેતત્તત્ત્વં યો વિજાનાતિ સ નિત્યં
શુદ્ધબુદ્ધપરમાનન્દપરમશિવસ્વરૂપઃ ॥

પુરા દેવાઃ પશુપાશાદ્વિમુક્તાઃ શિવં પૂજ્યૈવ હરિપદ્માદયોઽપિ ।
ઐન્દ્રનીલં પૂજિતં વિષ્ણુનાસીલ્લિઙ્ગં વૈડૂર્યં વિધિના પદ્મરાગમ્ ॥

શક્રેણ હૈમં યક્ષરાજેન વિશ્વેદેવૈ રૌપ્ય વસુભિઃ કાંસ્યકં ચ ।
યદ્વારુકૂટં વાયુના પાર્થિવં તદશ્વિભ્યામાસીત્ સ્ફાટિકં પાશિનાથ ॥

આદિત્યૈસ્તામ્રં મૌક્તિકં દેવતૈસ્તૈરનન્તાદ્યૈઃ ફણિભિશ્ચ પ્રવાલમ્ ।
દૈત્યૈર્જાલં રાક્ષસૈશ્ચ ત્રિલોહં ગણૈઃ શૈલં સૈકતં માતૃકાભિઃ ॥

દારૂદ્ભવં નિરૃતિના યમેન સુપૂજ્યમાસીન્મારકતં ચ રુદ્રૈઃ ।
સુભસ્મરૂપં સૂક્ષ્મરૂપં ચ લક્ષ્મ્યા શૈલાન્યેવ મુનયો ભેજિરેઽથ ॥

સરસ્વતી રત્નરૂપં ચ દુર્ગા હૈમં લિઙ્ગં પૂજયામાસ ભક્ત્યા ।
જલૈરુષ્ણૈઃ શીતલૈર્વા કદાચિદજ્ઞાનાદ્વા પતિતૈઃ પત્રપુષ્પૈઃ ।
તુષ્ટો યચ્છેદ્વાઞ્છિતાર્થં મહેશઃ કિં દુર્મભં શવભક્તસ્ય લોકે ॥

અત્યલ્પમપિ નૈવેદ્યં ફલં વા જલમેવ વા ।
તદેવ પ્રાશયિત્વાથ બ્રહ્મભૂયાય કલ્પતે ॥

કિમન્યૈર્ધાર્યૈર્ભસ્મનિ શુદ્ધપુણ્ડ્રે સ્થિતે
કિમન્યૈર્મન્ત્રવર્યેઽથ મન્ત્રૈઃ ।
શિવે સ્થિતે સર્વદેવાધિરાજે ભારદ્વાજ નિર્જરૈઃ કિં તથાઽન્યૈઃ ॥

સિદ્ધાન્તોઽયં નિશ્ચિતોઽસ્માભિરેષ ભારદ્વાજ ગુહ્યમેતન્ન વાચ્યમ્ ।
સદા પ્રશાન્તાય ન નાસ્તિકાય પરીક્ષ્યાથ બ્રૂહિ સર્વાર્થવેત્રે ॥

ઇત્યાહ ભગવાન્ સ્કન્દઃ । તામેનાં સિદ્ધાન્તશિખાં પ્રાતરધીયાનો
રાત્રિકૃતં પાપં નાશયતિ । સાયમધીયાનોઽહ્નિકૃતં પાપં નાશયતિ ।
સાર્વકાલં પ્રયુઞ્જાનઃ પાપૈરપાપો ભવતીતિ વિજ્ઞાયતે ।
ઇતિ વેદવચનં ભવતિ । ઇતિ વેદવચનં ભવતિ । ૐ સત્યમિત્યુપનિષત્ ॥

(શૈવ-ઉપનિષદઃ)

ઇતિ સિદ્ધાન્તશિખોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

*Siddhantashikha Upanishad*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*